ISSN : 2277-4351
RNI Reg:UTTMUL 2012/53882

DP-6

# वैदिक वाग् ज्योतिः
# Vaidika Vāg Jyotiḥ

An International Refereed Research Journal
on Vedic Studies

वर्ष-3 अंक 2 ,3 ,4 ,5

Jan.-June 2014, July–Dec. 2014
Jan.-June 2015, July–Dec. 2015

( संयुक्ताङ्क )

## Relevance of the Vedas in Perspective of Global Knowledge Systems



सम्पादक
प्रो. दिनेशचन्द्र शास्त्री

गुरुकुल कांगड़ी विश्वविद्यालय, हरिद्वार
(NAAC द्वारा 'ए' ग्रेड प्रदत्त एवं यू.जी.सी. द्वारा पूर्णतः अनुदानित समविश्वविद्यालय)
Gurukula Kangri Vishwavidyalaya
Haridwar-249 404 (Uttarakhand) India
http://www.gkv.ac.in

Vaidika Vāg Jyotih Vol.3, No. 2-5 (289-293) Jan. 2014 - Dec. 2015 ISSN 2277-4351

# अद्वैतवेदान्ते वेदापौरुषेयत्वविमर्शः

**जानकीशरणः**
सङ्कायाध्यक्षः- दर्शनम्
श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वैरावलम्

शोधसारः

[सर्वैरास्तिकदर्शनेषु इष्टानिष्टप्राप्ति-परिहारोपायभूतानां वेदानां प्रामाण्यमुररीक्रियत एव। वेदार्थावगमने तदनुसारिस्मृत्योऽपि प्रमाणभूताः। तत्तद्दर्शनेषु वेदानां प्रामाण्यं स्वतः इत्यपि स्वीक्रियते। किन्तु वेदाः पौरुषेयाः वा अपौरुषेयाः इत्यत्रास्ति विप्रतिपतिः। अद्वैतवेदान्ते वेदानाम् अपौरुषयत्वं स्वीक्रियते, किञ्च प्रत्यक्षप्रमाणापेक्षया श्रुतिरेव गरीयसी इत्यपि तत्र निगदितम्। तर्हि किन्नामापौरुषेयत्वं कथञ्च तदुपपाद्यते इति अद्वैतवेदान्तदिशा अस्मिन् शोधपत्रे विवेचितम्]

**सर्वविद्याप्रदीपकः**
**सर्वशास्त्रोपबृंहितः।**
**अपौरुषेयश्रुत्याख्यः**
**तदाम्नायोऽऽश्रीयते॥**

भारतीयास्तिकदर्शनशास्त्रेषु षडेव दर्शनानि वेदानां प्रामाण्यम् अभ्युपगछन्ति। वेदमपेक्ष्य लब्धप्रमाणम् इतिहासपुराणादिकं शास्त्रं स्मृतिशास्त्रमिति प्रथितम्। ऋषिभिः वेदस्य प्रत्यक्षीकरणाद् वेदः प्रत्यक्षं, एवञ्च प्रत्यक्षमाश्रित्य विद्यमानस्य इतिहासपुराणादिस्मृतिशास्त्रस्य अनुमानतुल्यत्वं सिद्ध्यति। अत एव ब्रह्मसूत्रेषु प्रत्यक्षशब्देन श्रुतिः अनुमानशब्देन च स्मृतिः प्रतिपादिता[1]। एतयोः श्रुतिस्मृत्योः प्रामाण्यं सर्वैरास्तिकदर्शनकारैः उररीक्रियते।

वेदान्ते खलु प्रस्थानत्रयी आद्रियते। तत्र श्रुतिप्रस्थानं स्मृतिप्रस्थानं च यथा प्रामाण्यत्वे-नाभ्युपेतं तथा न्यायप्रस्थानं बादरायणप्रणीतं ब्रह्मसूत्रमपि प्रमाणत्वेन स्वीक्रियते। अत्रैव विद्यते किञ्चिद्वैलक्षण्यं वेदान्तस्य इतरास्तिकदर्शन-सम्प्रदायेभ्यः। वेदान्तशास्त्रं यमेव मतविशेषं स्वीकृत्य सगुणत्वं वा द्वैतत्वमद्वैतत्वं विशिष्टाद्वैतत्वं वा प्रतिपादयति तत्र सर्वत्र एतस्य प्रस्थानत्रय-स्यावश्याङ्गीकरणीयत्वं निर्विवादम्। तत्रापि वेदस्यापौरुषेयत्वान्नित्यत्वाच्च स्वतःप्रामाण्यं पुरुषदोषलेशसंसर्गासम्भव इति कृत्वा वेदानां निरपेक्षं स्वार्थे प्रामाण्यम् अद्वैतवेदान्ते स्वीक्रियते। यथा घटपटादिकं पार्थिवं वस्तु चाक्षुषप्रत्यक्षे रूपदर्शने वा किञ्चित्तेजःपदार्थं सूर्यादिकमपेक्षते, किन्तु सूर्यः स्वप्रकाशने सूर्यान्तरं नापेक्षते अतः रूपप्रकाशने सूर्यस्य स्वतःप्रामाण्यम्।[2] अपि च प्रत्यक्षानुमानातिरिक्तेऽलौकिके विषये वेदस्य प्रामाण्यं निरपेक्षमेव। अत एवोक्तं सायणभाष्य-भूमिकायाम्- ''अलौकिकपदेन प्रत्यक्षानुमाने व्यावर्त्येते....तस्मादलौकिकोपायबोधको वेद इति.. अत एवोक्तं.... प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते। एतं विदन्ति वेदेन तस्माद् वेदस्य

वेदता।।[3]'' तदपेक्ष्य लब्धप्रमाणस्य स्मृतिशास्त्रस्य प्रामाण्यं पश्चाद्भवति[4]। श्रुतिं स्मृतिं चोभयमपेक्ष्य लब्धप्रमाणं न्यायप्रस्थानं ब्रह्मसूत्रात्मकं खलु ततोऽपि पश्चाद्भावि। अतो वेदस्य प्रबलतमं प्रामाण्यं ततो दौर्बल्यं स्मृतेः[5], ततोऽपि दौर्बल्यं प्रामाण्यं न्यायप्रस्थानस्येति[6]। अपि च श्रीमद्भागवते षष्ठस्कन्धे धर्मप्रमाणत्वेन परिगृहीतो वेदः ''वेदप्रणिहितो धर्मः ह्यधर्मस्तद्विपर्ययः। वेदो नारायणः साक्षात् स्वयंभूरिति शुश्रुमः[7]'' इति श्लोकेन साक्षात् भगवत्स्वरूपत्वेन प्रतिपाद्यते। तत्रैव भगवद्वाक्येन वेदस्य नित्यत्वमपि उक्तम्[8]। ''अपौरुषेयो वेदस्तु साक्षान्नारायणात्मकः'' इत्यनेन वेदस्यापौरुषेयत्वं प्रतिपादितम्।

एतदेव भगवता बादरायणाचार्येण ब्रह्मसूत्रेषु ''शास्त्रयोनित्वात्[9]'' इत्यनेन सूत्रेण समर्थितम्। तत्र प्रथमं तावत् साधनचतुष्टयसम्पन्नैः मुमुक्षिभिः अशेषदुःखनिर्मूलनाय निरतिशयानन्दरूपप्रत्यगभिन्नब्रह्मानुभवाय च वेदान्तविचारः कर्तव्यः इति प्रथमेन सूत्रेण प्रतिपादितम्।[10] ततो जिज्ञास्यत्वेन प्रतिज्ञातस्य ब्रह्मणः लक्षणं द्वितीयेन सूत्रेण[11] व्यवस्थापितम्। ततः ''मानाधीना मेयसिद्धिः'', ''प्रमेयसिद्धिः प्रमाणाद्धि'' इतिन्यायेन तार्तीयं सूत्रमित्थं सूत्रयामास सूत्रकारः- ''शास्त्रयोनित्वात्[12]'' इति। तत्र (1) शास्त्रस्य योनिः शास्त्रयोनिः, तस्य भावः शास्त्रयोनित्वम्, तस्मात् शास्त्रयोनित्वात्। (2) शास्त्रं योनिः यस्य तत् शास्त्रयोनि, तस्य भावः शास्त्रयोनित्वम्, तस्मात् शास्त्रयोनित्वात्, इति द्वेधा विग्रहो वेदान्ताचार्यसम्मतः। तत्र बादरायणाः ''अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः[13]'' इत्यादिश्रुतिमूलतया ब्रह्मविचारे प्रवर्तन्ते। तत्र भगवच्छङ्करपादाः ''महतः ऋग्वेदादेः शास्त्रस्य अनेकविद्यास्थानोपबृंहितस्य प्रदीपवत्सर्वार्थावद्योतिनः सर्वज्ञकल्पस्य योनिः कारणं ब्रह्म[14]'' इति शास्त्रयोनित्वाधिकरणभाष्ये विस्तरतो वेदानाम् अपौरुषेयत्वं साधयन्ति। स च वेदः विधि-मन्त्र-नामधेय-प्रतिषेध-अर्थवादात्मकः। वेदबोधितेष्टसाधनताकधर्मस्य अनिष्टसाधनताकाधर्मस्य च कथनेन विधिप्रतिषेधयोः प्रयोजनवत्त्वम्। मन्त्रभागस्य अनुष्ठानकालीनार्थस्मारकत्वेन प्रयोजनवत्त्वम्। विधायकवाक्यमेव ब्राह्मणमुच्यते। नामधेयानां सङ्कल्पादौ व्यावृत्तिर्व्यवहारो वा प्रयोजनं भवितुमर्हति। विधिप्रतिषेधसन्निधिपठितानां स्तुतिनिन्दापुराकल्पपरकृतिरूपाणाम् अर्थवादवाक्यानां विधेयधर्मप्राशस्त्यप्रतीतिजननद्वारा विधिवाक्यैकवाक्यतया, एवं प्रतिषेधविषयाधर्मजन्यदुःखादिनिन्दाप्रतीतिजननद्वारा च प्रतिषेधवाक्यैकवाक्यतया प्रामाण्यं भवति। अन्यरीत्या वेदानां स्वतःप्रामाण्यम् उत्पत्तिमत्वेऽपि अपौरुषेयत्वञ्च प्रतिपाद्यते अद्वैतवेदान्ते।

अत्रेयं शङ्का- ''अस्य महतो भूतस्य'' इत्यादिवाक्यस्य वेदानामुत्पतौ तात्पर्यं नास्ति। यतो हि वेदानामुत्पत्तिमत्त्वे अनित्यत्वमपरिहार्यम्। यतो हि उत्पत्तिमद्वस्तुनः नित्यत्वं नास्ति दृष्टचरं लोके। अथ च उत्पत्तिमत्त्वे पौरुषेयापत्तिः। पौरुषेयत्वप्रादुष्यात् वेदानां स्वतःप्रामाण्यं अस्तमियात्। अनृतव्याघातपुनरुक्तरागद्वेषादिदोषदूषितस्य पौरुषेयवचसः नित्यत्वं स्वतःप्रामाण्यत्वञ्च न सम्भवति। अपि च ''वेदः अपौरुषेयः वाक्यसमूहात्मकत्वात्, भारतादिवत्। अयञ्च वेदः वाक्यसमूहात्मकः, तस्मात् वेदः पौरुषेयः'' इति निगमनं सिद्ध्यति। वेदे काठकं, कौथुमं, पैप्पलादं, तैत्तिरीयकमित्याद्याः पुरुषसम्बद्धाः समाख्याः श्रूयन्ते। ''तेन प्रोक्तम्'', ''कृते ग्रन्थे'' इति पाणिन्यनुशासनेन कृतार्थे प्रोक्तार्थे एव तद्धितप्रत्ययो भवति, तेन वेदानामप्रोक्तत्वे अकृतत्वे च तादृशप्रयोगा-

सम्भवः। ततश्च वेदानां कार्यत्वमेवावगम्यते। कार्यस्य कर्तृपूर्वकत्वात् कश्चन कर्ता अस्तीति पौरुषेयत्वमवशात् स्वीकर्तव्यम्।

अत्रायं समाधिः- सर्वज्ञब्रह्मणः सकाशात् ऋग्वेदादेः या उत्पत्तिः श्रूयते सा मुख्यैव। सर्वज्ञत्वात् ब्रह्म गतकल्पीयं वेदं स्वरवर्णपद-वाक्यादीनामानुपूर्वीव्यमन्तरेण[15] यथापूर्वमादि-जीवाय हिरण्यगर्भाय उपदिशति। अतः सर्गादौ परमेश्वरः गतकल्पीयं वेदमेव प्रथमजीवाय उपदिशति[16], अतः "अस्य महतो भूतस्य निः श्वसितम्...." इत्यादिश्रुत्या वेदानामुत्पत्तिः मुख्यैव कथिता।

अत्र पुनः शङ्का- ननु आम्नायस्य जनिमत्वे अपौरुषेयत्वं स्वतःप्रामाण्यञ्च कथं सम्भवतः? अत्रोच्यते- किमिदमपौरुषेयत्वम् इति विचारः कर्तव्यः। उच्यते-सजातीयोच्चारणानपेक्षोच्चारण-विषयत्वं पौरुषेयत्वं तद्भिन्नत्वमपौरुषेयत्वम्। अर्थात् प्रमाणान्तरेण अर्थं बुद्ध्वा तदर्थज्ञापनाय स्वेच्छया शब्दप्रयोगः पौरुषेयः। यथा नद्यास्तीरे फलानि सन्तीत्यादि वाक्यम्। वेदानां विषये तु पूर्वतनकल्पीयो वेदः तथैव संस्मृत्य उपदिष्टः अतो नास्ति तत्र पौरुषेयापत्तिः। "तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे। छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत[17]", "तेभ्यः.....त्रयो वेदाः अजायन्त..." इत्यादिवेदवाक्यादेव वेदानां यज्जनिमत्त्वं ज्ञायते तत्तु पूर्वोक्तरीत्या गतकल्पीयं वेदं परमेश्वरः अस्मिन् कल्पे स्मृत्वा उपदिशति इत्यवगन्तव्यम्।

भामतीकारैरपि इत्थमभ्यधायि शास्त्रयो-नित्वाधिकरणभाष्यव्याख्याने। तद्यथा- "येऽपि तावत् वर्णानां नित्यत्वमास्थिषत तैरपि पदवाक्यादीनामनित्यत्वमभ्युपेयम्। आनुपूर्वी-भेदवन्तो हि वर्णाः पदम्। पदानि चानुपूर्वीभेदवन्ति वाक्यम्। व्यक्तिधर्मश्चानुपूर्वी न वर्णधर्मः, वर्णानां नित्यानां विभूनां च कालतो देशतो वा पौर्वापर्यायोगात्। व्यक्तिश्चानित्येति कथं तदुप-गृहीतानां वर्णानां नित्यानामपि पदता नित्या। पदानित्यतया च वाक्यादीनामप्यनित्यता व्याख्याता। तस्मान्नृत्तानुकरणवत् पदाद्यनुकरणम्। यथाहि यादृशं गात्रचलनादि नर्तकः करोति तादृशमेव शिक्ष्यमाणानुकरोति नर्तकी, न तु तदेव व्यनक्ति। एवं यादृशीमानुपूर्वी वैदिकानां वर्णपदादीनां करोत्यध्यापयिता तादृशीमेवानुकरोति माणवकः, न तु तामेवोच्चारयति, आचार्य-व्यक्तिभ्यो माणवकव्यक्तीनामन्यत्वात्। तस्मान्नित्यानित्यवर्णवादीनां लौकिकवैदिक-पदवाक्यादिपौरुषेयत्वे विवादः, केवलं वेदवाक्येषु पुरुषस्वातन्त्र्यास्वातन्त्र्ये विप्रतिपत्तिः।[18]" तदेवोक्तं कुमारिलभट्टपादैः - "यत्नतः प्रतिषेध्या नः पुरुषाणां स्वतन्त्रता[19]" इति। तत्र सृष्टिप्रलयमनिच्छन्तो जैमिनीयाः जगतः सृष्टिं स्रष्टारं परमेश्वरञ्चानभ्युपगम्य वेदाध्ययनं प्रति अस्मादृशगुरुशिष्याध्ययनपरम्परया वेदस्य नित्यत्वं सङ्गिरन्ते। वैयासिकं तु मतमनुवर्त्तमानाः श्रुतिस्मृतीतिहाससिद्धसृष्टिप्रलयौ उररीकृत्य अनाद्यविद्योपधानलब्धसर्वशक्तिज्ञानस्यापि परमात्मनः नित्यस्य वेदानां योनेरपि न स्वातन्त्र्यम्। एवञ्च कल्पे कल्पे समानां सृष्टिं निरूपयन्तो वेदान्तिनः वेदस्यापौरुषेयत्वं नित्यत्वञ्च प्रतिपादयन्ति।[20]

यत्तु "वेदः पौरुषेयः वाक्यसमूहात्मकत्वात् भारतादिवाक्यवत्" इत्यनुमानं प्रोक्तं, तत् सोपाधिकं व्याप्यत्वासिद्धं प्रदर्श्य हेतुरस्तु साध्यं मास्तु इति अप्रयोजकशङ्काद्वारा निराकर्तुं शक्यम्। तद्यथा- वेदः प्रागभावप्रतियोगितावच्छेदक-धर्माभाववान् अस्मर्यमाणकर्तृकत्वात् आत्मादिवत् इति प्रतिकूलतर्केण सत्प्रतिपक्षित्वम्।

वाक्यत्वहेतुश्च जन्यज्ञानमूलकत्वेन सोपाधिक इति अप्रयोजकः।

अपि च पदसमूहं वाक्यं चेतनपुरुषसम्बन्ध-मन्तरा उत्पत्तुं न शक्यम्। एवञ्च मीमांसकानां मते वर्णाः, नित्याः अथापि वर्णसमूहः वाक्यं, चेतनापेक्षोत्पत्तिकं, अतः वाक्यं नित्यमिति वक्तुं न शक्यते। तस्मात् वाक्यस्य वाक्यसमूहरूप-वेदस्य च कश्चन कर्ता अवश्यं स्वीकर्तव्य एव। परन्तु तस्य कर्तुः उत्पादयितुर्वा तद्रचने स्वातन्त्र्यं न स्वीक्रियते। पूर्वपूर्वकल्पावस्थितं वेदं परमेश्वरः नूतनकल्पारम्भे तथैव रचयतीति स्वीक्रियते। भारतादिग्रन्थानान्तु स्वतन्त्रतया कर्तृभिः रचितत्वात् पौरुषेयत्वं दोषः। अत्र तु न तादृशो दोषः अस्ति। अत एव ''अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा। आदौ वेदमयी विद्या यतः सर्वाः प्रवृत्तयः[21]।। इत्यादिस्मृतिः उपपद्यते। इति शम्।।

## सन्दर्भाः


1. ब्रह्मसूत्रशाङ्करभाष्यम्
2. ऋग्वेदः
3. बृहदारण्यकोपनिषत्
4. श्वेताश्वतरोपनिषत्
5. तत्तिरीयसंहिता, सायणभाष्यम्,
6. महाभारतम्
7. मीमांसासूत्रम्
8. श्रीमद्भागवतम्
9. रघुवंशम्


## सन्दर्भ-सूची

1. ''शब्दः, इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम्''- ब्रह्मसूत्रम् 1.3.28। अत्रेदं शाङ्करभाष्यम् - ''प्रत्यक्षं श्रुतिः, प्रामाण्यं प्रत्यनपेक्षत्वात्। अनुमानं स्मृतिः, प्रामाण्यं प्रति सापेक्षत्वात्''- ब्रह्मसूत्रशाङ्करभाष्यम्, 1.3.28 पृ. 322
2. ''वेदस्य हि निरपेक्षं स्वार्थे प्रामाण्यं रवेरिव रूपविषये''- ब्रह्मसूत्रशाङ्करभाष्यम् 2.1.1
3. तैत्तिरीयसंहिता, सायणभाष्यभूमिका, पृ. 2
4. ''श्रुतेरिवार्थं स्मृतिरन्वगच्छत्'' रघुवंशम्, 2.2
5. ''विरोधे त्वनपेक्षं स्यादसि ह्यनुमानम्''- मीमांसासूत्रम् 1.3.3
   अपि चात्र भाट्टकारिकात्रयम्-
   या तु वेदाविरुद्धेह स्मृतिः काचन दृश्यते।
   सा तु स्याद्भ्रान्तिमूलैव न स्पष्टश्रुतिमूलिका।।
   स्वातन्त्र्येण प्रमाणत्वं स्मृतेस्तावन्न संयतम्।
   वेदमूलानुमानं च प्रत्यक्षेण विरुद्ध्यते।।
   वेदवाक्यानुमानं हि तावदेव प्रवर्त्तते।
   तदर्थविषयं यावत् प्रत्यक्षं नोपलभ्यते।।
6. शारीरकभाष्यस्य आनन्दमयाधिकरणे श्रुति-विरोधमुपगत्य न्यायप्रमाणगतसूत्राण्यन्यथा व्याख्याय श्रुतेरेव प्रबलं प्रामाण्यं प्राधान्यञ्चोद्घोषयामासाचार्यङ्करः, ब्रह्मसूत्रशाङ्करभाष्यम्, 1.1.12-19
7. श्रीमद्भागवतम् 6.1.40
8. ''शब्दब्रह्म परं ब्रह्म ममोभे शाश्वती तनू''- श्रीमद्भागवतम् 6.16.51
9. ब्रह्मसूत्रम् 1.1.3
10. ''अथातो ब्रह्मजिज्ञासा''-ब्रह्मसूत्रम् 1.1.1
11. ''जन्माद्यस्य यतः''- ब्रह्मसूत्रम् 1.1.2
12. ब्रह्मसूत्रम् 1.1.3
13. बृहदारण्यकोपनिषत्, 2.4.10
14. ब्रह्मसूत्रशाङ्करभाष्यम् 1.1.3, पृ. 96
15. ''धाता यथा पूर्वमकल्पयत्''- ऋग्वेदः 10.190.3

16. "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै..." – श्वेताश्वतरोपनिषत्, 6.18
17. ऋग्वेदः 10.90.9
18. ब्रह्मसूत्रशाङ्करभाष्यभामतीव्याख्यानम्, 1.1.3 पृ. 98–99
19. श्लोकवार्तिकम्, पृ. 802
20. अत्र भामतीव्याख्यानम्, "तथाहि यागादिब्रह्महत्यादयोऽर्थानर्थहेतवो ब्रह्मविवर्ता अपि न सर्गान्तरे विपरीयन्ते। नहि जातु कश्चित् सर्गे ब्रह्महत्याऽर्थहेतुरनर्थहेतुश्चाश्वमेधो भवति। अग्निर्वा क्लेदयति। आपो वा दहन्ति, तद्वत्। यथात्र सर्गे नियतानुपूर्व्यं वेदाध्ययनमभ्युदयनिःश्रेयसहेतुरन्यथा तदेव वाग्वज्रतयानर्थहेतुः एवं सर्गान्तरेष्वपीति तदनुरोधात् सर्वज्ञोऽपि सर्वशक्तिरपि पूर्वपूर्वसर्गानुसारेण वेदान् विरचियन्न स्वतंत्रः। पुरुषास्वातन्त्र्यमात्रं चापौरुषेयत्वं रोचयन्ते जैमिनीया अपि। तच्चास्माकमपि समानमन्यत्राभिनिवेशात्।"– ब्रह्मसूत्रशाङ्करभाष्यभामतीव्याख्यानम्, 1.1.3 पृ. 98–99
21. महाभारतम्, 12.232.24–25

✦✦✦

**उत्तिष्ठता प्रतरता सखायः।** –अथर्व. 12.2.27
उठो, मित्रो! पार हो जाओ।

**तमो व्यस्य।** –अथर्व. 12.3.18
तमोगुण को अपने अन्दर से निकाल दे।

**सर्वा अरातीरवक्रामन्नेहि।** –अथर्व. 13.1.20
सब शत्रुओं को पददलित करता हुआ आगे बढ़।